सर्वत्र शुद्धता न पुनर्भवेत् । तस्माच्छुद्धं तु कर्मण्यं शुचीत्याहुर्मनीषिणः। निर्मलं संस्कृतं द्रव्यं क्रियार्हं पूतमुच्यते। वसतिश्चर्मसोयानं वाहनं साधनाम्बु च । कुरी नौरासनं चेति स्वयं शुद्धमिति स्मृतम् । शिशवश्च स्वयंशुद्धा योषितश्चानृतौ तथा । ब्रह्महत्या हि नारीणामृतुकाले न संस्पृशेत् । आकरा हि स्वयं शुद्धा द्रव्याणामिह-निर्णयः । भस्म क्षौद्रं सुवर्णं च सदर्भाः कुतपास्तिलाः । अपामार्गशमीकाशाः पद्मामामलकं मणिः । माल्यानि सर्षपा दूर्वाः सदा भद्राः प्रियङ्गवः । अक्षतारोचनालाजा हरिद्राश्चन्दना यवाः । पलाशखदिराश्वत्थतुलसीधातकीतकी । एतान्याहुः पवित्राणि ब्राह्मणा हव्यकव्ययोः । यौक्तिकानि मलघ्नानि शोधनानि च देहिनाम् । तेष्वापोगोशकृन्मृच्च पवित्राणि विशेषतः । सर्वाशौच विशुध्यर्थं सर्वेषां सर्वतः सदा । अकृष्णलैः समिद्धोऽग्निर्दुर्मलुष्यैरदूषितः । सर्वेषामप्यशौचानां समर्थः शोधनाय सः । द्रव्याणामग्निदग्धानां मेध्यत्वमुपदिश्यते । ज्वालाभिस्पृष्टपात्राणां शुचित्वं नियतं भवेत् । अग्नेर्दृष्टपलमुक्तस्य ग्रहणं नास्त्यनापदि । श्वपाको दृषलाभस्तु ब्राह्मणोऽग्निरनाहितः । चण्डालाग्नेरमेध्याग्नेः सूतकाग्नेश्च कर्हिचित् । पतिताग्नेश्चिताग्नेश्च न शिष्टैर्ग्रहणं स्मृतम् । गोशकृच्छुद्धदेशस्था श्मशानाद्यचिता शिवा । अग्राम्या शुद्धवेच्छुद्धा श्लक्ष्णा विण्मूत्रवर्जिता । ऊर्द्ध्वं नाभेर्यानि खानि तानि मेध्यानि सर्वशः” देवलः । “ऊर्द्ध्वं वै पुरुषस्य नाभेर्मेध्यमर्वाचीनममेध्यमिति” श्रुतिः । “अजाश्वं मुखतोमेध्यं न गौर्न नरजा मलाः” विष्णुः ऊर्द्ध्वं नाभेः पुरुषोगौर्मेध्यः पृष्ठे समन्तादश्वः स्त्रियः सर्वतो हृदयमासामशुचि” उश० । “मेध्या रहोगता नारी स्त्री मुखे शुचिचारिणी । स्पर्शने तु न दुष्यन्ति वातो गन्धोरसः स्त्रियः । स्त्रीणां मुखरसश्चैव गन्धोनिश्वास एव च । मुखतोगौरमेध्यास्यान् मेध्योऽजोमुखतः स्मृतः । पृष्ठतोगौर्गजः स्कन्धे सर्वतोऽश्वः शुचिस्तथा । नृणां मूत्रपुरीषे तु अमेध्ये मल एव च । गोपुरीषं तु मूत्रं च नित्यं मेध्यमिति स्थितिः । यमः “पादौ शुची ब्राह्मणानामजाश्वस्य मुखं शुचि । गवां पृष्ठानि मेध्यानि सर्वगात्राणि योषिताम् । रोमोद्भेदे शशी भुङ्क्ते गन्धर्वाः कुचदर्शने । अनलस्तु रजोभुङ्क्ते स्त्रियोमेध्यास्तु नान्यथा । बलात्कारोपभुक्ता वा चौरहस्तगतापि वा । स्वयं वा प्रतिपन्ना वा अथवा विप्रमादिता । अत्यन्तदूषितापि स्त्री न परित्यामर्हति । सर्वेषां निष्कृतिः प्रोक्ता नारीणां तु विशेषतः । स्त्रियः पवित्रमतुलं नैता दुष्यन्ति कर्हिचित् । मासिमासि रजस्तासां दुष्कृतान्यपकर्षति। सोमः शौचं ददौ स्त्रीणां गन्धर्वश्च शुभां गिरम् । पावकः सर्वभक्षत्वं मेध्या वै योषितो ह्यतः”। ज्योतिषोक्तम् खराद्यपेक्षया दुष्टसमये अनिष्टस्थानस्थरव्यादिकतयानिष्टसूचनमपि अशुद्धिः ज्योतिषोक्तनञः पर्य्युदासप्रसज्यप्रतिषेधोभयपरतायाः सर्वनिबन्धृभिर्व्यवस्थापनात् तत्र निषिद्धकालस्य न केवलं रात्र्यादिकालादिवत् पर्य्युदस्तता किन्तु प्रसज्यप्रतिषेधपरतया अनिष्टविशेषसूचकतापि तेन तत्र तत्र अनिषिद्धकालस्याशुद्धता । अतएव गोचराशुद्धिः कालाशुद्धिरिति च व्यवह्रियते” तथाच ज्योतिषोक्तदिशा तत्तत्कालानां तत्तत्कर्म्मकरणायोग्यताप्रयोजकतया शुक्रास्तादिकालस्याशुद्धता सा च अकालशब्दे उक्तप्राया । “रविशुद्धौ ग्रहकरणं रविगुरुशुद्धौ व्रतोद्वाहौ” इत्युक्तेः गोचरे शुभस्थानस्थितौ रव्यादीनां शुद्धिस्तद्विपरीत्ये अशुद्धिः एवं वर्षर्त्तुमासदिवसानामप्यशुद्धिः सा च कन्यकानां दशवर्षाभ्यन्तरे एव विवेचनीया नातः परम् । “ग्रहशुद्धिमब्दशुद्धिं शुद्धिर्मासर्त्तुदिवसानाम् । अर्वाग्दशवर्षेभ्यः प्रवदन्ति कन्यकाना”मित्युक्तेः ।

**अशुभ** न०विरोधे न०त०। १अमङ्गले “यः सर्व्वत्रानभिस्नेहस्तत्तत् प्राप्य शुभाशुभम्” गीता । २तत्सूचके रव्यादिपापग्रहे “अशुभे दण्डसंयोगे वेधश्चेत्तेन लभ्यते” ज्योति० अशुभसूचका अमङ्गलसूचकास्ते च साधारणा असाधारणाश्च अमङ्गलशब्दे २१६ पृष्ठादौ दर्शिताः अन्येऽपि अशुभयोगा अरिष्टाध्यायोक्ताः असाधारणा वेदितव्याः । ३अपवित्रे च न०ब०। ४शुभाभाववति त्रि०।५ब०।५पापे न०।

**अशुभ्र** पु० विरोधे न०त०। १शुभ्रभिन्ने कृष्णे २तद्युते त्रि०।

**अशुष** त्रि० न शुष्यति शुष—क न०त० । अशोषके । “रक्षो अग्निमशुषं तूर्वयाणम्” ऋ० १।१७४।२ ।

**अशून्य** त्रि० न०त० । अहीने पूर्णे “अशून्यशयनं भद्यान्मम जन्मनि जन्मनि” शय्यादानमन्त्रः ।

**अशून्यशयन** न० न शून्यं शयनं यस्मात् । व्रतभेदे । “अस्ति व्रतं महापुण्यमशून्यशयनं नृप!” इत्युपक्रम्य “चातुर्मास्ये भवेद्राजन् वर्षायाम् व्रतमुत्तमम् श्रावणस्य द्वितीयायां कृष्णपक्षे नराधिप ! । श्रावणादिकार्त्तिकान्तं कुर्य्याद्व्रतमनुत्तमम्” इत्यादिना तस्य विधानमभिधाय “चतुर्वर्षं प्रकुर्वीत पुरुषोनियतेन्द्रियः । एवं यः कुरुते राजन्